द्वावेतौ जलयोगौ च प्रभूतजलदायकौ ॥१५२

नभस्य कृष्णसप्तम्यामष्टम्यां यदि लक्षणम् ।[3]
एभिर्दिनैः समादेश्यो जलयोगसमुद्भवः ॥१५३

अवर्षन्तो यदा यान्ति[4] वारिदा विद्युता युताः ।
जलयोगस्तदा ज्ञेयो गर्जितं[5] विद्युता सह ।
एवं योगोद्भवे[6] देवि चाश्वयुङ्मासिवर्षणम् ॥१५४

1. D ०गु०
2. D omits this line. M numbers it as 151½.
3. In M v. 153 has three lines. In place of 153a the two lines read
   नभस्य कृष्णसप्तम्यां अमायां हि तथैव च ।
   तथैव कृष्णसप्तम्यामष्टम्यां यदि लक्षणम् ॥
4. M वा०
5. M ०र्जतो
6. M ०गाद्भवेद्दे०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फाल्गुनस्य च मासस्य वर्षा चेदष्टमी दिने।
सुभिक्षं च तदादेश्यं शस्यसम्पत्तिरुत्तमा ॥१५५[1]

इति फाल्गुनमासफलम्।

अथ चैत्रमासफलम्।

चैत्राद्यपक्षतौ पौष्णं वैशाखे याम्यमेव च।
ज्येष्ठाद्यपक्षतौ चान्द्रं पुनर्वसु शुचौ तथा ॥१५६

एँभिस्तु तिथिभिः सार्द्धं तानि भानि भवन्ति चेत्।
सुभिक्षं शस्यसम्पत्तिस्तद्वर्षे च जलं बहु ॥१५७

योगाभावे च सर्वेषां दुर्भिक्षं खण्डवर्षणम् ॥१५८

फाल्गुने चैत्रमासे च सङ्क्रान्तौ यदि वर्षणम्।
विचित्रं जायते शस्यं वैशाखज्येष्ठयोस्तथा ॥१५९

चैत्रे वा श्रावणे वापि पञ्चार्काश्चेद्भवन्ति हि।
दुर्भिक्षं तत्र जानीयाद् राजविघ्नं समादिशेत् ॥१६०

चैत्रे वा श्रावणे वापि पञ्चवारफलं शृणु।
मङ्गले म्रियते राजा भास्करे म्रियते प्रजा ॥१६१

बुधे रसः क्षयं याति दुर्भिक्षं च शनैश्चरे।
दुर्भिक्षं तत्र जानीयाद् राजविघ्नं समादिशेत् ॥१६२[4]

शुक्लपक्षे तु चैत्रस्य चतुर्थीपञ्चमीषु च।
वर्षणं प्राक् शुभं किंचित्क्रमादुत्तरतो घनाः ॥१६३

चैत्रस्य शुक्लपञ्चम्यां रोहिणी यदि दृश्यते।
साभ्रं नभस्तदाऽऽदेश्या[5] गर्भस्य परिपूर्णता ॥१६४

चैत्रस्य शुक्लपञ्चम्यामभ्रच्छन्नं[6] यदा नभः।
निर्मला वा दिशः सर्वा दृश्यन्ते वायुना युताः ॥१६५

गोधूमांस्तत्र गृह्णीयान्महर्घानपि बुद्धिमान्।
संप्राप्ते श्रावणे मासि लाभश्च त्रिगुणो भवेत् ॥१६६[7]

---

1. D omits verses 146 and 155.
2. D मै०
3. D आ०
4. D omits verses 160 to 162.
5. M omits ss.
6. M ०छ०
7. D omits verse 166.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीये दिवसे प्राप्ते चैत्रे वायुश्च सर्वतः।
तत्र मेघाः प्रदृश्यन्ते वृष्टिर्भाद्रपदे ध्रुवम् ॥१६७

तृतीये दिवसे प्राप्ते उत्तरो यदि मारुतः।
नवमेघाः प्रदृश्यन्ते कार्तिके वृष्टिमादिशेत् ॥१६८

चतुर्थे दिवसे प्राप्ते मेघजालं प्रदृश्यते।
दुर्भिक्षं जायते घोरमनावृष्ट्या न संशयः ॥१६९

दिनद्वयं यदा याति वायुर्दक्षिणपश्चिमः।
तदा न दृश्यते धान्यं दुर्भिक्षं चात्र जायते ॥१७०

तृतीयायां च पञ्चम्यां वायुः पूर्वोत्तरो यदि।
सर्वशस्यानि जायन्ते प्रजाः कृतयुगोपमाः ॥१७१

चैत्रे मासि तु देवेशि शुक्लगे पञ्चमीदिने।
सप्तम्यां च त्रयोदश्यां यदा देवः प्रवर्षति ॥१७२

तारकापतनं चैव गर्जनं विद्युता सह।
वर्षाकालस्तदा छिन्नो नात्र कार्या विचारणा ॥१७३

चैत्रस्यादौ दिवसदशके कल्पयित्वा क्रमेण
स्वात्यन्तार्द्राप्रभृति मुनिभिर्वृष्टिहेतोर्विलोक्य।
यावत्संख्ये भवति दिवसे दुर्दिनं वाऽथ वृष्टिः
तावत्संख्यं भवति नियतं वार्षिकं दग्धमृक्षम् ॥१७४

मूलादियमभान्तं च चैत्रकृष्णे निरीक्षयेत्।
एभिश्च गलितैश्चैव गर्भस्रावो भविष्यति ॥१७५

साभ्रेऽह्नि हन्यते वृष्टिर्निरभ्रे वृष्टिरुत्तमा।
आषाढं रोहिणी हन्ति शिवभं श्रावणं तथा।
पुष्यो भाद्रपदं हन्ति चित्रा चाश्विनमेव च ॥१७६

चैत्रस्य शुक्लपञ्चम्यां सप्तम्यां नवमीतिथौ।
पौर्णमास्यां तथा चैव जलयोगविनिश्चयः ॥१७७

पञ्चमी सह रोहिण्या सप्तमी रौद्रसंयुता।
नवमी सह पुष्येण ज्ञातव्या कालचिन्तकैः ॥१७८

1. M ०ञ्च०
2. M ०त्यंत्रा०
3. M श्रा०
4. D ०मीन०
5. M ०ण्यां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चित्रायुता पौर्णमासी विद्युन्मेघसमन्विता ।
एभिश्च गलितैर्ऋक्षैर्गर्भस्रावं समादिशेत् ॥१७९

पुष्टैः पुष्टिः समादेश्या नान्यर्क्षैः कदाचन ।
भवन्ति गलिता गर्भा एभिर्नान्यैः प्रवर्षति ॥१८०

चैत्रस्य शुक्लपक्षे तु त्रयोदश्यां तथैव च ।
धूमिका[1] जायते यत्र मेघस्तत्र न वर्षति ॥१८१

आर्द्रादिनवनक्षत्रं[2] शुक्ले चैत्रे निरीक्षयेत् ।
वाताभ्रगर्जनाम्बूनि विद्युत्तत्र न वर्षति ॥१८२

चैत्रे मासि सिते पक्षे सप्तम्यादिदिनाष्टके ।
यदाभ्रं विद्युदम्भो वा नदीदूरे गृहं कुरु ॥१८३

अत्र सर्वत्र वृष्टिस्तु स्वल्पा चेच्छुभकारिका ।
कर्दमादिकरी सा तु ह्यनिष्टा परिकीर्तिता ॥१८४

इति चैत्रमासफलम् ।

अथ वैशाखमासफलम् ।

सम[4]मारुततडित्तोयस्तनिताभ्रादिलक्षणैः ।
वैशाखः पञ्चरूपी स्यात्तदा गर्भाः शुभाः स्मृताः ॥१८५

तथा च वराहोक्तम् ।

पवनसलिलविद्युद्[5]गर्जिताभ्रान्वितो यः
स भवति बहुतोयः पञ्चरूपाभ्युपेतः ।
सृ[6]जति यदि तोयं गर्भकाले[7] तु भूरि
प्रसवसमयमित्वा शीकराम्भः करोति ॥१८६

अन्यच्च ग्रन्थान्तरे ।

वैशाखे गर्जितं विद्युत् सलिलं पवनो घनः ।
उष्णं ज्येष्ठे विशिष्टं स्यात् किमन्यैर्गर्भचेष्टितैः ॥१८७

---

1. M ०श्रा०
2. D भू०
3. M ०द्रा०
4. M सु०
5. M ०त्
6. Br. Sam. XXI.37-विसृ०
7. Ibid.-०ऽतिभू०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैशाखशुक्लपञ्चम्यां अभ्रच्छन्नं यदा नभः ।
गर्जते वर्षते वापि पूर्ववातो यदा भवेत् ॥१८८

उदयास्तमनं यावत् ज्ञातव्यं च विचक्षणैः ।
संग्रहेत्सर्वधान्यानि प्रवराणि सुराधिपे ॥१८९

मासि भाद्रपदे नित्यं महर्घाणि भवन्ति हि ॥१९०[2]

वैशाखमासप्रतिपत्सप्तमीनवमीषु च ।
अष्टमीषु तथा चैव मेघो व्याप्नोति चाम्बरम् ॥१९१

मेघा[3] वर्षन्ति[4] वै क्षिप्रं सुवृष्टिं तत्र निर्दिशेत् ।
एवं च कथितं देवि वैशाखे शुक्ल एव च ॥१९२

इति वैशाखमासफलम् ।

अथ ज्येष्ठमासफलम् ।

ज्येष्ठस्य प्रथमे पक्षे या तिथिः प्रथमा भवेत् ।
आयाता केन वारेण तां वै पश्येत्प्रयत्नतः ॥१९३

भानुना पवनो वाति कुजो व्याधिकरो मतः ।
राजपुत्रेण दुर्भिक्षं भवतीह न संशयः ॥१९४

गुरुभार्गवसोमानामेकोऽपि यदि जायते ।
जलशोषं प्रजानाशं छत्रभङ्गं च निर्दिशेत् ॥१९५

आर्द्रादिनवऋक्षाणि ज्येष्ठे शुक्ले निरीक्षयेत् ।
साभ्रे च हन्यते वृष्टिर्निरभ्रे वृष्टिरुत्तमा ॥१९६

ज्येष्ठशुक्लप्रतिपदि सूर्यस्यास्तमये प्रिये ।
कीलमादौ समारोप्य ज्ञेयमस्तमने तलम् ॥१९७

द्वितीयायां निरीक्षेत चन्द्रं तद्वामदक्षिणे ।
रवेरस्तमयस्थाने व्रजेदस्तं हि चन्द्रमाः ॥१९८

मध्यमं जायते वर्षं दुर्भिक्षं खण्डमण्डले ।
सूर्याच्च जायते स्थाने चन्द्रास्तं किल चोत्तरे ॥१९९

1. M ०छ०
2. D omits verses 188 to 190.
3. D ०घो
4. D ०ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(महासुभिक्षमादेश्यं बहुवृष्टिर्वसुन्धरा)।[1]
दक्षिणे दिशि तत्स्थानात् चन्द्रास्तो यदि पार्वति।
दुर्भिक्षं रौरवं घोरं विग्रहात् क्षोयते प्रजा ॥२००

चर्तुदश्याममायां वा ज्येष्ठस्य प्रतिपद्दिने।
आषाढे च विशेषेण शशिसूर्यनिरींक्षणम् ॥२०१

ज्येष्ठे प्रत्यूषप्रभवो वायुस्तापकरो रविः।
अतिवृष्टिं विजानीयात् तस्मिन् वर्षे न संशयः ।२०२

चित्रास्वातिविशाखासु यस्मिन् मासि न वर्षति।
तन्मासे निर्जला मेघा यदि वर्षं न वर्षति ॥२०३

ज्येष्ठस्य शुक्लपञ्चम्यां गर्जितं श्रूयते यदि।
दक्षिणस्यां यदा वायुरभ्रच्छन्न यदा नभः ॥२०४

शस्यानां सङ्ग्रहं कुर्यात् त्रिगुणोऽश्विनके[3] भवेत्।
[4]ज्येष्ठे सितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः ॥२०५[5]

मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च।
स्वल्पाद्ये[6] वृष्टे नभश्चतुष्टये[7] क्रमान्मासाः ॥२०६

श्रावणं[8]पूर्वा ज्ञेयाः परिस्रुता[9] धारणास्ताः स्युः ॥२०७

यदि ताः स्युरेकरूपाः
शुभास्ततः सान्तरास्तु न शिवाय।
तस्करभयदाः[10] प्रोक्ताः
श्लोकाश्चाप्यत्र वासिष्ठाः ॥२०८

---

1. Added by D.
2. M अ०
3. M drops ss.
4. Br. Sam. XXII. I—ज्यै०
5. After this verse M mentions in one line verse nos. 8/9/10/11. Lines 205b and 206a form Br. Sam. XXII. 1 and lines 206b and 207 form Br. Sam. XXII. 2.
6. Br. Sam. XXII. 2-तत्रैव स्वात्याद्ये
7. Ibid—भच०
8. M ०र्ण०
9. M ०श्रु०
10. Br. Sam. XXII. 3—०दाश्चो०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदा वा[1] विद्युत्[2] श्रेष्ठाः शुभाशाः प्रत्युपस्थिताः ।
तदाऽपि[3] सर्वशस्यानां[4] वृद्धिं ब्रूयाद्विपश्चितः[5] ॥२०९

सपांसुवर्षाः[6] सापश्च शुभा बालक्रिया[7] अपि[8] ।
पक्षिणां[9] सुस्वरा वाचः क्रीडापांसुजलादिषु[10] ॥२१०

रविचन्द्रपरीवेषा. स्निग्धा नात्यन्तदूषिताः[11] ।
वृष्टिस्तदापि विज्ञेया सर्वशस्याभिवृद्धये[12] ॥२११

मेघाः स्निग्धाः संहताश्च[13] प्रदक्षिणगतिक्रियाः ।
तदा स्यान्महती वृष्टिः सर्वशस्यार्थसाधिका[14] ॥२१२

इति बृहस्पतिसंहितायां[15] धारणाध्यायः ।

ज्येष्ठस्यैव तु मासस्य शुक्लपक्षे शृणु प्रिये ।
पूजां सुशोभनां कृत्वा.....[16] ॥२१३

उच्चस्थानेषु संस्थाप्य महादण्डं महाध्वजम् ।
एवं कृत्वा प्रयत्नेन प्रकुर्यात् कालनिर्णयम् ॥२१४

एकवातो यदा वाति चतुर्दिनानि चोत्तरे ।
चतुरो वार्षिकान् मासान् ध्रुवं वर्षति माधवः ॥२१५

विपरीतो यदा वाति यानिचिद्[17]भानि वा[18] पुनः ।
तानिचिद्[17] भानि वर्षन्ति प्रावृट्काले न संशयः ॥२१६

---

1. Br. Sam. XXII. 5—तु
2. Ibid—तः
3. M drops s
4. Br. Sam—स०
5. Ibid—चक्षणः
6. Br. Sam. XXII. 6—०शु०
7. M वलि०
8. M ०भि०
9. M द०
10. Br. Sam. ०शु०
11. M ०श्चा
12. Br. Sam. XXII. 7—सस्यार्थसाधिका
13. M ०हि०
14. Br. Sam. XXII. 8—सस्याभिवृद्धये
15. To be corrected as ०त्संहि०.
16. M leaves it blank.
17. M ०ह्ला०
18. M वायुनः (ना)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमं पश्चिमो वातः चतुर्दिनानि वाति चेत् ।
अनावृष्टिं विजानीयाद् दुर्भिक्षं रौरवं भवेत् ॥२१७

उत्तरोऽप्यथ[1] चाग्नेयश्चतस्रो[2] हन्ति वा[3] दिशः ।
चत्वारो वार्षिकान् मासान् मेघा वर्षन्ति वै भृशम् ॥२१८

विपरीतं यदा वाति चतस्रो हन्ति वा दिशः ।
रविमार्गपरिभ्रष्टः[4] शृणु तस्यापि लक्षणम् ॥२१९

शीतकाले भवेद् वृष्टिः वर्षाकाले न विद्यते ।
विपरीतो यदा वातो वर्षाकाले विनिर्दिशेत् ॥२२०

वायव्यां पश्चिमे चैव नैर्ऋत्यां[5] यान्ति वायवः ।
आषाढे श्रावणे छिद्रं द्वौ मासौ वृष्टिरुत्तमा ॥२२१

पूर्वस्यां तथैशान्यामाग्नेयां यान्ति वायवः ।
भाद्रपदाश्विनौ छिद्रमाषाढे वृष्टिरुत्तमा ॥२२२

वक्ष्यामि रोहिणीयोगं ज्येष्ठाषाढसमुद्भवम् ।
अवृष्टिदं नभोव्यग्रं[6] समेघं वृष्टिकारकम् ॥२२३

सुभिक्षं जलपातेन न चैवेति भयं क्वचित् ।
अभ्रैस्तु मध्यमा वृष्टिर्वृष्टे वृष्टिस्तथोत्तमा ॥२२४

निरभ्रे न तु वृष्टिः स्यात् रोहिणीन्दुसमागमे ।
सुभिक्षं प्रथमे पादे द्वितीये सर्पकीटकाः ॥२२५

पादे चैव तृतीये तु मध्यमां वृष्टिमादिशेत् ।
चतुर्थे मन्दवृष्टिः स्यात्सर्वशस्यानि पञ्चमे ॥२२६

षष्ठे तु मुद्गमाषाश्च[7] तुषधान्यानि सप्तमे ।
अष्टमे तु महावृष्टिः छिद्रं वर्षति माधवः ॥२२७

न माघे पतितं शीतं ज्येष्ठे मूलं च वृष्टिकृत् ।
नार्द्रायां पतितं तोयं दुष्टकालस्तदा मतः ॥२२८

---

1. M drops s.
2. M ०लभ्रो घ्न०
3. M वा
4. M ०ष्टो
5. M ०ऋ०
6. To be corrected as ०ऽनभ्रं.
7. M मुंग०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्येष्ठस्य पूर्णिमायां तु मूलं वै वर्षते यदि ।
षष्टि घस्रा न वर्षन्ति पश्चाद् वर्षन्ति वारिदाः ॥२२९

पादानां संख्यया वृष्टौ वृष्टिरोधं विनिर्दिशेत् ॥२३०

ज्येष्ठे च मासे बहुले च पक्षे,
नक्षत्रयुग्मं श्रवणो[1] धनिष्ठा ।
यावद्घटी गर्जति विद्युदभ्रं,
तावच्छुभं वर्षति गर्गभाषितम् ॥२३१

ज्येष्ठे चापरपक्षे तु द्वे ऋक्षे श्रवणादिके ।
अवर्षणे न वर्षन्ति[2] वर्षिते वर्षणं सदा ॥२३२

अवस्थानं रवेर्ज्येष्ठे ह्यमायां यन्न वीक्ष्यते ।
तदुत्तरेण चन्द्रास्ते सुवृष्टिश्च महर्घता ॥२३३

ज्येष्ठे मासे ह्यमायां वै पौर्णमास्यामथापि वा ।
दिवा वा यदि वा रात्रौ मेघो भवति चाम्बरे ॥
अवृष्टिस्तु भवेत्तत्र नात्र कार्या विचारणा ॥२३४

इति ज्येष्ठमासफलम् ।

अथाषाढमासफलम् ।

यावती भुक्तिराषाढे शुक्लप्रतिपदा दिने ।
पुनर्वसोश्चतुर्मांस्यां[3] वृष्टिः स्यात्तावती स्फुटम् ॥२३५

आषाढमासे प्रथमे च पक्षे निरभ्रदृष्टे रविमण्डले च ।
न विद्युतो गर्जति नैव वृष्टिर्मासद्वयं[4] वर्षति नैव देवः ॥२३६

आषाढशुक्लपञ्चम्यां पश्चिमो यदि मारुतः ।
गर्जते वर्षते वापि शक्रचापं च दृश्यते ॥२३७

संग्रहेत्सर्वधान्यानि कार्तिके च महर्घता ।
शीघ्रं लाभमवाप्नोति नान्यथा मुनिभाषितम् ॥२३८[5]

आषाढे शुक्लपक्षे तु रोहिणीयोग उत्तमः ।
तत्राभ्रं विद्युदम्भो वा कालो निष्पद्यते तदा ॥२३९

---

1. M ०णे
2. M ०न्ते वर्षन्ते वर्षते स०
3. M ०र्दृश्यां
4. M मा०
5. D omits verses 237 and 238.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न वृष्टीरोहिणीयोगे न चेत्पूर्वोत्तरो[1]ऽनिलः ।
वर्षा नैव गृहं यामः पर्याप्तं कृषिलक्षणम् ॥ २४०

माघे च फाल्गुने मासि चैत्रवैशाखयोस्तथा ।
स्वातियोगं विजानीयादाषाढस्य सितेऽपि वा ॥२४१

आषाढे स्वातिनक्षत्रे जलयोगः स्फुटो भवेत् ।
तत्राभ्रं विद्युदम्भो वा धान्यनिष्पत्तिकारणम् ॥२४२

यदा नवम्याञ्चाषाढे शुक्लायां निर्मलो रविः ।
तस्यामेव तिथौ रात्रौ सच्छिद्रः शशलाञ्छनः ॥२४३

दृश्यते निर्गतो वापि तदा काले[2]ऽतिदुस्तरः ।
उदये वाथ मध्याह्ने यन्नक्षत्रं तथाऽ[3]स्तके ॥२४४

वर्षते चतुरो मासान् विपर्यासे विपर्ययः ।
शुक्ले गर्भाश्च निष्पन्नाः कृष्णे वर्षन्ति वै सदा ॥२४५

आषाढे चैव सङ्क्रान्तौ यदि वर्षति माधवः ।
व्याधिरुत्पद्यते घोरा श्रावणे शोभनं तथा ॥२४६

आषाढे स्वातिनक्षत्रे जलं पातयते यदि ।
तदाभ्रं विद्युदम्भो वा नदीदूरे गृहं कुरु ॥२४७

आषाढे तु यदा मासि द्वादशीप्रतिपद्दिने ।
पूर्णिमायां यदाऽ[4]श्व्यं शुभो वातः प्रवाति च ॥
सर्वं चैव भवेदन्नं देवो वर्षति भूरिशः ।२४८

आषाढे[5] सूर्यतः पृष्ठे भौमो गच्छति वृष्टिकृत् ।
देवो वर्षति व[6]ह्वम्बु अत्यन्तान्नं[7] च जायते ॥२४९

[8]·····महर्घं तत्र पूर्वान्मासमध्ये प्रजायते[9] ।
वर्षाकाले त्रिमासेषु नक्षत्रं वर्धते स्फुटम् ।
तिथिश्च क्षीयते तर्हि शुभकालः सदा भवेत् ॥२५०

---

1. M drops s.
2. M ०स्ति
3. M drops s.
4. M drops s व.
5. M ०ढं
6. M यद्य०
7. M ०नं
8. M leaves it blank.
9. D omits this line.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्ध्याकाले स्निग्धा दण्डतडिन्मत्स्यपरिधिपरिवेषाः[1]।
सुरपतिचापेनावृतरविकिरणाश्चाशु[2] वृष्टिकराः ॥२५१

प्रभाते पश्चिमेन्द्रस्य धनुश्च यदि दृश्यते।
वारुणै[3]श्चैव नक्षत्रैः शीघ्रं वर्षति माधवः ॥२५२

आग्नेयं वारुणं चैव वायव्यं च महेन्द्रकम्।
यन्नक्षत्रस्थितः सेज्यो मार्तण्डश्शुभप्रदः ॥२५३

एतत्सर्वं विशेषेण विस्तरेण वद प्रभो।

[4]ईश्वर उवाच।

अन्यच्च संप्रवक्ष्यामि मेघानां शृणु लक्षणम् ॥२५४

कृत्तिका च विशाखा च पूर्वाभाद्रपदा तथा।
मघा पुष्यो[5]ऽथ भरणी पूर्वा[6]फाल्गुनिरेव च ॥२५५

आग्नेयं मण्डलं ह्येतत् सकलं गिरिजे शृणु।
यद्यत्र चलते भूमिः परिवेशः शशिसूर्ययोः ॥२५६

भूविदारो[8]ऽथ निर्घात उल्का पातयते यदि।
विधुमार्तण्डयोर्ग्राहः केतोश्चैव तु दर्शनम् ॥२५७

रक्तवृष्टिः पांशुवृष्टिः पाषाणपतनं तथा।
तारकापतनं चैवमन्यत्किञ्चिन्महाद्भुतम् ॥२५८

तत्र रोगोतिस्तारादेरग्नेः परिभवो भवेत्।
अल्पक्षीरप्रदा गावः स्वल्पपुष्पफला द्रुमाः ॥२५९

अल्पशस्यं च विज्ञेयमनावृष्टिश्च जायते।
कपालफलहस्ताश्च दृश्यन्ते क्षुधया जनाः ॥२६०

सैंधवं यामुनं चैव कच्छ[9]काम्बोजबाह्लिकाः।
जालन्धराश्च काश्मीराः समस्तं चोत्तरापथे ॥२६१

---

1. M drops दण्ड and धि.
2. M ०शुभवृ०
3. M ०णे चै०
4. M इ०
5. M drops s.
6. M ०र्व०
7. M ०र०
8. M drops s.
9. M ०छ०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एते देशा विनश्यन्ति तस्मिन्नुत्पातदर्शने ।
त्रिमासिकं तु चाग्नेयं वारुणं पञ्चमासिकम् ॥२६२

मासमेकं तु वायव्यं माहेन्द्रं सप्तरात्रकम् ॥२६३

विशेषतस्त्वाङ्गिरसा मार्तण्डसूनुना सह ।
आग्नेयमण्डलस्थेन देशा सोपद्रवा इमे ॥२६४

हस्तश्चित्रा च स्वाती च मृगो वाथ पुनर्वसुः ।
उत्तराफाल्गुनी चैवाप्यश्विनी रेवती तथा ॥२६५

वायव्यां तद्विजानीयात् त्रिधोत्पातश्च तत्र चेत् ।
महावातस्तथा वाति महामायाविमोहितः ॥२६६

उद्यताः सजला मेघा न मुञ्चन्ति जलं तदा ।
देवा विप्राश्च राजानो जनाश्च भुवनानि चेत् ॥२६७

नष्टधर्मा निराचारा हाहाभूतप्रचेतसः ।
प्राकारं गिरिशृंगानि तोरणांदोलिकास्तथा ॥२६८

वायुना धूयमानास्तु वृक्षाः पतन्ति भूतले ।
पाञ्चालाः शूरसेनाश्च शबरा म्लेच्छबर्बराः ॥२६९

कलिङ्गा मागधाश्चैव आन्ध्रा द्रविडकास्तथा ।
एते देशा विनश्यन्ति तस्मिन्नुत्पातदर्शने ॥२७०

शनिर्देवगुरुश्चैव वायव्ये मण्डले स्थितः ।
कुरुते नान्यथा देवि एतत्सर्वं वरानने ॥२७१

आश्लेषा चैव मूलश्च पूर्वाषाढा तथैव च ।
रेवती वारुणं रौद्रं अहिर्बुध्न्यं तथैव च ॥२७२

वारुणं तद्विजानीयात्तत्रोत्पाते त्विदं फलम् ।
बहुक्षीरधृता गावो बहुपुष्पफला दुमाः ।
नीरोगा मनुजाः सर्वे सर्वशस्या च मेदिनी ॥२७३

कीटका मूषकाश्चैव शलभा मर्कटास्तथा ।
मत्स्याः सरीसृपाश्चैव तथैव च पिपीलिकाः ॥२७४

अन्ये च स्थलजा जीवा वारिजाश्च भयातुराः ।
धान्यानि च समर्घाणि सुभिक्षं जायते क्षितौ ॥२७५

---

1. M शृ०
2. M नि०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सागराः क्षीरसौराष्ट्रं तथैव सिन्धुपारगाः ।
उदुम्बरमहिच्छत्रं नागपूरं तथैव च ॥२७६

एते देशा विनश्यन्ति तस्मिन्नुत्पातदर्शने ॥२७७

वारुणे मण्डले चैव शनीज्यौ[1] यदि तिष्ठतः ।
ज्येष्ठा च रोहिणी चैव मित्रदेवं च वैष्णवम् ॥२७८

धनिष्ठा चोत्तराषाढा विधिभं सप्तमं तथा ।
माहेन्द्रं तद्विजानीयात्तत्रोत्पाते फलं शृणु ॥२७९

मुदिताश्च जनाः सर्वे[2] भयरोगविवर्जिताः ।
सन्धिं कुर्वन्ति राजानः सुभिक्षं भूतले भवेत् ॥२८०

सरितः[3] सागराश्चैव मध्यदेशस्तथैव च ।
कुरुक्षेत्रमनन्तं च पाणिपंथं तथैव च ॥२८१

पूर्वस्यां दिशि ये देशा विग्रहस्तत्र दारुणः ।
एते देशा विनश्यन्ति तस्मिन्नुपातदर्शने ॥२८२

माहेन्द्रमण्डले देवि शनीज्यौ भवतो न चेत् ।
तदा स्वास्थ्यं प्रजासौख्यं नैश्चित्यं वरवर्णिनि ॥२८३

एकस्मिन्मण्डले देवि शनीज्यौ स्थितौ न चेत् ।
तदा लोके जनमकरो भवति त्रिभागशेषः[4] ॥२८३अ

वसुन्धरा भवति निर्घातो भूमिकम्पश्च खरतरपवनः
पांसुवर्षाणि वृष्टिरुल्कापातोऽथ केतुर्दिनशशिनो वेष्टनं तद्ग्रहस्य ।

तारापाताभिपातो दहनमपि दिशां त्वैव मुत्पातदैस्तैः
विद्धं नक्षत्रस्य वक्रे गतमशुभशुभं ज्ञातिभिः कालरूपम् ॥२८४[4]

एकपक्षो यदा राहुर्ग्रसते शशिभास्करौ ।
राजपुत्रसहस्राणां रुधिरं पिबते मही ॥२८५

---

1. M ०नि०
2. M ०ष्ठ०
3. M ०षा
4. The manuscript is confusing. There are two verses here, but the numbering suggests that they were considered to form one verse. Verse no. 284 is not indicated in the manuscript. The reading is also not clear.
5. M गृस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वावुत्पातावेकमासे दिव्यभौमान्तरिक्षकौ ।
राजशोषं प्रजानाशं छत्रभंगं तदा वदेत् ॥२८६

सप्तदिनान्तरे वृष्टिश्चेद् भवति तदा दोषाभावः ।

अथ प्रकृतमनुसरामः ।[1]

आषाढे तु घटीषष्ठ्या मासद्वादशनिश्चयः ।
पञ्चनाडी भवेन्मासः षष्ठ्या वर्षविनिर्णयः ॥२८७

सर्वरात्रं यदाऽभ्राणि वातः पूर्वोत्तरो यदि ।
वर्षत्तत्र कणाः पुष्टाः जायते जगदीप्सितम् ॥२८८

यदि नाभ्रस्य लेशोऽपि वातः पूर्वोत्तरो न हि ।
न वर्षते तदा मेघो दुष्टकालो भवेदिह ॥२८९

यत्र मासविभागे च निर्मलं दृश्यते नभः ।
तत्र हानिस्त्वनावृष्टिर्विज्ञेयं गर्गभाषितम् ॥२९०

यदाभ्रं पञ्चनाडीषु वायुः पूर्वोत्तरो भवेत् ।
तत्र मासे भवेद्वृष्टिः पवनाभ्रादिमानतः ॥२९१

तत्र रात्रौ च विज्ञेयं वाताद्यं[2] सर्वदिग्गतम् ।
वृष्ट्यादिसहितैरभ्रैः पूर्णिमा सुखदायिनी ॥२९२

दिनरात्रिविभागेन यदाभ्राणि भवन्ति हि ।
तस्मिन् काले ध्रुवं वृष्टिर्ऋतुनाडीप्रमाणतः ॥२९३

येषु मासेषु ये दग्धा गर्भाः पौषादिसम्भवाः ।
तद्रात्रौ पञ्चनाडीषु चन्द्रो भवति निर्मलः ॥२९४

पौषादिसम्भवो गर्भो ध्रुवमुत्पातसम्भवः ।
सिताषाढीदिनं सर्वं द्रष्टव्यं वृष्टिहेतवः ॥२९५

यद्याषाढीदिने रात्रौ वाताभ्रादि शुभं भवेत् ।
तदा गर्भाः शुभा ज्ञेयाः शीतकालेऽपि धीमता ॥२९६

एकमेव दिनं प्रेक्ष्य कालनिष्पत्तिहेतवे ।
अष्टयामाभ्रवातैश्च वर्षं यावत्तदा शुभम् ॥२९७

आषाढीपूर्णिमारात्रौ यदि चन्द्रो न दृश्यते ।
चतुरोऽपि तदा मासान् जलं वर्षति माधवः ॥२९८

---

1. D introduces verses 287 to 319 as आषाढमासे वृष्टिगर्भपर्यवेक्षणानि ।
2. D omits this line.
3. M पौ०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आषाढीपूर्णिमारात्रौ यदि चन्द्रोऽपि निर्मलः ।
प्रजाः प्रपीडिताः सर्वा दुर्भिक्षं रौरवं भवेत् ॥२९९

यदि तत्रामलश्चन्द्रः परिवेषयुतोऽथवा ।
तदा जगत् समुद्धर्तुं शक्रेणापि न शक्यते ॥३००

चतुर्दश्यसिताषाढी हीना वर्षे यदा भवेत् ।
भवाश्रयेण तद्वाच्यं महर्घं च समे समम् ॥३०१

आषाढी त्वधिका तस्याः समर्घं तु तदामतम् ॥३०२

आषाढ्यां भास्करास्ते सुरपतिककुभो वाति वातः सुवृष्टिः
शस्यध्वंसं प्रकुर्याद् यदि दहनदिशो मन्दवृष्टिर्यमेन ।
नैर्ऋत्यां[2] मध्यशस्यं वरुणदिशि जलं वायुना वायुकोपः
कौवेर्यां शस्यपूर्णा भवति वसुमती तद्वदीशानवाते ॥३०३

आषाढ्यां पूर्ववातेन सर्वशस्या च मेदनी ।
आषाढ्यामग्निवातेन अस्थिशेषा मही भवेत् ॥३०४

आषाढीपौर्णमास्यां तु दक्षिणो यदि मारुतः ।
तदा सुभटकोटीनां मही पिबति शोणितम् ॥३०५

आषाढ्यां नैर्ऋतो वायुर्यदि तत्र प्रदृश्यते ।
विक्रयित्वा तदा सर्वं कर्तव्यो धान्यसंग्रहः ॥३०६

आषाढ्यां वारुणे वाते वृष्टिः शस्यं भवेद्ध्रुवम् ।
शलभादि च वायव्ये मशकाश्च पतन्ति हि[3] ॥३०७

उत्तरे मारुते लोका गीतवाद्यशुभैर्युताः ।
ऐशाने मारुते वाति समर्घं प्रचुरं भवेत् ॥३०८

आषाढ्यां पौर्णमास्यां तु ईशानो मारुतो भवेत् ।
अस्तं गच्छति शीतांशौ शस्यसम्पत्तिरुत्तमा ॥३०९

यावद् हंससमा[4] मेघा यावदग्निसमो रविः ।
यावत्कौबेरको वायुस्तावन्मेघः प्रवर्षति ॥३१०

यावत्काकोदरा मेघा यावच्चन्द्रसमो रविः ।
यावच्च नैर्ऋतो वायुस्तावन्मेघो न वर्षति ॥३११

---

1. M पौ०
2. M ०ऋ०
3. D omits this line.
4. Read घं०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुचौ कृष्णचतुर्थ्यां तु तुषारानपि पातयेत् ।
जलपक्षे तदा सर्वं शस्यं भवति भूतले ॥३१२

शुचौ कृष्णचतुर्थ्यां चेदभ्रैः प्रच्छाद्यते[1] रविः ।
त्रिमासं पक्षसंयुक्तं तदा वर्षति वारिदः ॥३१३[2]

शुचौ कृष्णचतुर्थ्यां चेदग्निर्भास्करमण्डले ।
न वर्षन्ति तदा मेघास्तदा कष्टतरं[3] जलम् ॥३१४

वृत्तायामाषाढ्यां कृष्णचतुर्थ्यामजैकपादर्क्षे[4] ।
यदि वर्षति पर्जन्यः प्रावृट् शस्ता न चेत्तः ॥३१५

ततो भाद्रपदा[5] मन्ये यत्र देवो न वर्षति ।
आषाढकृष्णपक्षे च चतुर्थी पञ्चमी तथा ॥३१६

अष्टमी सप्तमो चैवामावास्याप्रतिपद्यदि ।
तत्र वृष्टौ.....गर्भा न संशयः[6] ॥३१७

अभ्राणि पीतवर्णानि कृष्णवर्णानि पार्वति ।
पश्चिमे चैव संध्यायां वासु देवि भवेद्यदि ।
सद्य एव भवेद् गर्भो वर्षते नात्र संशयः ॥३१८

आषाढे दशमी कृष्णा सुभिक्षाय[7] सरोहिणी ।
एकादशी च मध्यस्था द्वादशी कालभञ्जनी ॥३१९

इति आषाढमासफलम् ।[8]

अथ श्रावणमासफलम् ।

चैत्रे वा श्रावणे वापि पञ्चार्काश्चेद्भवन्ति हि ।
दुर्भिक्षं तत्र जानीयात् छत्रभङ्गञ्च निर्दिशेत् ॥३२०[9]

---

1. M ०क्षा०
2. D omits this verse.
3. M ०र०
4. M ०दृक्षे
5. M भ०
6. The line is incomplete in M.
7. D दुर्भि०
8. Not in M.
9. D omits this verse.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चित्रा-स्वाती-विशाखासु श्रावणे चेन्न वर्षति।
त्यक्त्वाऽऽवासं तदा दूरे नदीमध्ये गृहं कुरु ॥३२१

यदाऽऽषाढे न वृष्टोऽसौ[1] तदा तु[2] चकितो जनः।
भविष्यति वरो योगः श्रावणे सप्तमी दिने ॥३२२

श्रावणे शुक्लसप्तम्यामस्तङ्गच्छति भास्करे।
न दृष्टो यदि पर्जन्यो जलाशां मुञ्च सर्वथा ॥३२३

श्रावणे शुक्लपक्षे चेत् स्वातियोगे जलं वहु।
निष्पत्तिः सर्वशस्यानां प्रजाश्च निरुपद्रवाः ॥३२४

श्रावणे कृष्णपक्षे तु पूर्वभाद्रपदासु च।
चतुर्थ्यां यदि वृष्टिः स्यात् तदा वर्षति वारिदः ॥३२५

श्रावणस्य त्वमायां चेद् गर्भ उत्पद्यते ध्रुवम्।
उत्तरे कृष्णमेघाश्च पूर्वस्यां तु तथैव च ॥३२६

श्रावण्यां पौर्णमास्यां तु श्रावणे चेज्जलं भवेत्।
शुभं सर्वं समादेश्यं तस्मिन् वर्षे न संशयः ॥३२७

अमायां चेद् भवेद्देवि श्रावणे गर्भसम्भवः।
गर्भश्चोत्पद्यते तस्य चोत्तरे कृष्णमालिका ॥३२८

भवेच्च पूर्वदिग्भागे धूम्रवर्णो भवेत् क्वचित्।
मेघाश्च सजलाश्चैव पीतकृष्णा भवन्ति हि ॥३२९

अस्तमये यदा देवि सन्ध्याकाले च दृश्यते।
अर्धरात्रे गते वृष्टिः प्रभाते विमले तथा।३३०

[3]इति श्रावणमासफलम्।

अथ भाद्रपदमासफलम्।[4]

मासि भाद्रपदे प्राप्ते सङ्क्रान्तौ यदि वर्षति।
बहुरोगास्तदा प्रोक्ता आश्विने चैव शोभनम् ॥३३१

चतुर्थ्यां शुक्लपक्षे तु पञ्चम्याश्चैव सुन्दरि।
सप्तमी चाष्टमी चैव पूर्णिमा चैव जायते ॥३३२

---

1. M नष्टो
2. M नु
3. Before it M adds तिथिगर्भः।
4. M drops पद.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकत्र संघटश्चैव भवेत्पर्वतमालिका ।
पञ्चसप्तदिनान्येव एतानि कथितं तव ॥३३३

गर्जते नात्र सन्देहो वर्षते सप्तरात्रकम् ।
एवमेकार्णवा चैव पृथ्वी भाद्रपदस्य तु ॥
वर्षन्ते निश्चयं मेघा नात्र कार्या विचारणा ॥३३४

यदा भाद्रपदे मासि प्रतिपद्दशमीदिने ।
सप्तम्यां पौर्णमास्यां च नवम्याञ्च यथाक्रमम् ॥३३५

मेघा यदा प्रदृश्यन्ते पश्चिमां दिशमास्थिताः ।
तद्वर्षे सततं चैव बहूदकं विनिर्दिशेत् ॥३३६

मासार्क्षात्पूर्णिमा हीना समाना यदि वाधिका ।
समर्घं च समार्घं च महर्घं च यथाक्रमम् ॥३३७

तद्भवेच्छ्रावणे स्वाती तिथियोगे सुनिश्चितम् ।
षष्ठ्यां शुक्ले भाद्रपदे मैत्रभे तद्वदेव तु ॥३३८[1]

इति भाद्रपदमासफलम्[2] ।

अथाश्विनमासफलम् ।

सप्तम्याश्वयुजे मासि सिताष्टमी जलान्विता ।
सुभिक्षं तत्र चादेश्यं राजानः शान्तविग्रहाः ॥३३९

तथा चाश्वयुजे मासि प्रतिपद्दशमी तथा ।
तथैव चाष्टमी शुक्ला अम्बरे मेघदर्शनम् ॥३४०

क्षिप्रवृष्टि विजानीयाद् दुष्टः[3] कालो[4] भविष्यति ।
आश्वयुजस्य मासस्य चतुर्थी पञ्चमी तथा ॥३४१

वर्षते गर्भहीना च शास्त्रदृष्टं न संशयः ॥[5]
आश्विने श्वेतपक्षे तु चतुर्थी पञ्चमी तथा ।
सप्तमी चाष्टमी चैव पूर्णमासी तथैव च ॥३४२

कृष्णपक्षे तु प्रतिपत्पञ्चमी च चतुर्दशी ।
वृद्धिर्गा[6]श्चेत् सुभिक्षाय त्रुटिता दौस्थ्यकारिणी ॥३४३

इति आश्विनमासफलम्[7] ।

---

1. D omits verses 337 and 338.
2. Not in M.
3. M ०ष्टे
4. M ०ले
5. After this line M adds इति तीर्थः सद्योगर्भः ।
6. M ०त्रा०
7. Not in M.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ मेघदर्शनकृतसद्योगर्भलक्षणम् ।

पूर्वस्यां यदि सन्ध्यायां मेघसञ्छादितं नभः ॥३४४

केचिदुष्ट्रसमा[1] मेघाः केचित्कुञ्जरसन्निभाः ।
केचिद् वै शूकरमुखाः केचिन्महिषसन्निभाः ॥३४५

केचिद् वै पर्वताकारा केचिद् वृषभसन्निभाः ।
एतद्वर्णाश्च ये मेघा वर्षन्ते नात्र संशयः ॥३४६

पञ्चरात्रं भवेद् वृष्टिः सप्तरात्रं विधीयते ।
उत्तरे यदि संध्यायां दृश्यते घनमालिका ॥३४७

अम्बुदा गोमयाकारा दृश्यन्ते यदि पार्वति ।
तृतीये दिवसे वृष्टिर्द्रोणसंज्ञो[2] भवेत्तदा ॥[3]३४८

पश्चिमे चैव सन्ध्यायां जलदा गिरिसन्निभाः ।
वर्षते सप्तरात्रं वा त्रिरात्रं पञ्चरात्रकम् ॥३४९

द्रोणमेकं तु देवेशि वर्षन्ते नात्र संशयः ॥३५०

दक्षिणे यदि मेघः स्यात् कोटिनादसमुद्भवः ।
वर्षते च त्रिरात्रेण त्रिरात्रं पञ्चरात्रकम् ॥३५१

आग्नेय्यां यदि मेघाश्च जायन्ते वरवर्णिनि ।
रात्रौ प्रवर्षते मेघ इति भैरवमब्रवीत् ॥३५२

ऐशान्यां[4] तु यदा मेघो जायते यदि पार्वति ।
वातवृष्टिं[5] विजानीयात् प्रहरार्धे न संशयः ॥३५३

नैर्ऋत्ये च यदा भागे उत्पद्यन्ते घटाकुलाः ।
.....॥[6]३५४

वायव्ये[7] तु यदा मेघा जायन्ते वरवर्णिनि ।
वातवृष्टिं विजानीयाद् रात्रौ स्यात्प्रहरादिने ॥३५५

मेघास्तु कथिता देवि ईदृशाष्टौ प्रकीर्तिताः ॥३५६

इति मेघदर्शनकृतसद्योगर्भलक्षणम् ।[8]

---

1. M कच्चिदृष्टस्तदृक्
2. M ०ख्या
3. D omits this line.
4. M ई०
5. M जा०
6. This line is blank in M.
7. M ०ल०
8. M reads इति सद्योगर्भः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ वायुधारणम् ।

वायुधारणमेवं हि शृणु तत्त्वेन सुन्दरि ।
सुभिक्षं पूर्ववातेन जायते नात्र संशयः ॥३५७

आग्नेय्यां खण्डवृष्टिश्च जायते गिरिजात्मजे ।
दक्षिणे भयभीतिः स्यात् नैर्ऋत्यां कलहावहः ॥३५८

वारुणे दिव्यधान्यं च वायव्ये वातसम्भवः ।
उत्तरे शुभदं प्रो[1]क्तमैशान्यां सर्वसम्पदः ॥३५९

वायुधारणमेवं च कथितं तव सुन्दरि ॥३६०

इति वायुधारणम् ।

अथ विद्युत्फलम् ।

विद्युतो लक्षणं वक्ष्ये शृणु पार्वति निश्चितम् ।
येन विज्ञायते सर्वं मेघानां च प्रवर्षणम् ॥३६१

उत्तरेण यदा विद्युत् हेमवर्णा प्रकाशते ।
विशाला दीर्घिका चैव शीघ्रं वर्षति माधवः ॥३६२

ऐन्द्री च जलदा विद्युदाग्नेयी जलनाशिनी ।
याम्या चात्मजला प्रोक्ता नैर्ऋती निर्जला स्मृता ॥३६३

कथयन्ती राजवैरं प्रजानां च प्रपीडनम् ।
प्रभूतजलदा ज्ञेया वारुणी सर्वसम्पदः ॥३६४

वातं करोति वायव्या कौबेरी क्षिप्रवर्षिणी ॥
ईशानी सर्वदा प्रोक्ता लक्षणं विद्युतस्त्विदम् ॥३६५

यत्र देशे सुभिक्षं च विद्युत्तत्रैव गच्छति ।
दिक्षु भूतास्थिनिर्गुप्ता मेघानां गर्भदर्शिनी ॥३६६

विद्युद्[2]धीना गर्जना न न गर्जति जलं विना ।
मेघावलीति विख्याता एते सारसमुच्चयाः ॥३६७

इति विद्युत्फलम् ।

---

1. M रोपमी०
2. M ०त्ही०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ आर्द्राफलम् ।[1]

शुक्रे चास्तमिते वृष्टिरुदिते च बृहस्पतौ ।
चलत्यंगारके वृष्टिर्वक्रे चैव शनैश्चरे ॥३६८

उत्तरासमघास्वातीरेवतीरोहिणीषु च ।
एषु याते धरापुत्रे वृष्टिं न कुरुते यतः ॥३६९

आर्द्रा विपत्तिदा प्रातर्मध्याह्ने शं[2] फलप्रदा ॥३७०

प्रत्यूषकाले जगतां विपत्ति-
र्मध्यंदिने स्वल्पजला च पृथ्वी ।
अस्तंगतार्द्रा बहुशस्यभूतलं
स्वस्थं सुभिक्षं खलु चार्द्धरात्रौ ॥३७१

रवौ तु वातं प्रकरोति चार्द्रा
भौमेति शोकं रविजे तथैव ।
सोमे सौम्ये च गुरौ च शुक्रे
स्वस्थं सुभिक्षं प्रकरोति चार्द्रा ॥३७२

इत्यार्द्रा[3]फलम् ।

अथ शुक्रचारफलम् ।[4]

वारो भवेद्वै विजयादशम्यां
भविष्यराजा ननु भाविवर्षे ।
मन्त्री भवेच्चापयुते च भानौ
शस्याधिपं कुम्भगतं वदन्ति ॥३७३

स्वयं राजा स्वयं मन्त्री स्वयं शस्याधिपस्तथा ।
तत्र तोयं न पश्यन्ति वर्जयेच्च मुहुर्मुहुः ॥३७४

मासाधिपेनैव च होनमासः
पर्वद्वयं ग्राससमस्तयुक्तम् ।
भूयान्तरं वापि जनान्तरं वा
कालः करोतीह विनिश्चयेन ॥३७५

---

1. Not in M.
2. To be corrected as सा ।
3. M द्रा०
4. Not in M.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदा गुरुर्भार्गव एकराशौ
प्रचण्डचण्डः प्रबलोऽथ वायुः।
अकालवृष्टिर्नरपेषु युद्धं
महर्घता शस्यविनाशनञ्च ॥३७६

देवगुरुश्च दानवगुरुरेकराशौ यदा गतौ।
अन्नं महर्घतां याति नरवराश्च युध्यन्ति ॥३७७

यदा गुरुरुदयति चन्द्रमण्डले
शनिमंगारकं शुक्रमथाऽपि वा।
तदा मही शोणितकर्दमाकुला
परस्परं घ्नन्ति वसुन्धराधिपाः ॥३७८

धनुषि मिथुने च कन्यायां मीनस्थेऽपि शनैश्चरे।
दुर्भिक्षं जायते घोरं पित्रा विक्रीयते सुतः ॥३७९

मीने धने वा मिथुने च कन्ये
धरासुते सूर्यसुते च वक्रे ॥
तदा मही रुण्डकमालभूषितं।
त्रिभागशेषां कुरुते वसुन्धराम् ॥३८०

रेवती जलनाशाय शस्यनाशाय चाश्विनी।
भरणी सर्वनाशाय यदि न वर्षति कृत्तिका ॥३८१

रवेः पुरस्ताद्विचलद् ग्रहेन्द्रः
सौम्येन वर्ज्यं जलदान्निहन्ति।
अस्तंगतः स्यान्महती च वृष्टिः
क्षेमं सुभिक्षं निरुपद्रवं च ॥३८२

वाताभ्रविद्युत्स्तनितोदकानि
सरागसन्ध्या परिवेशचापं।
हिमप्रपातः प्रतिसूर्यकश्च
दशं प्रकारैर्भवतीह गर्भः ॥३८३

उल्कापातो दिशांदाहो निर्घातः पांसुवृष्ट्यः।
शक्रचापं ग्रहयुद्धं च षडेते गर्भपातकाः ॥३८४

बुधशुक्रौ समीपस्थौ रवेरेकर्णवा मही।
तयोर्मध्यगतो भानुः समुद्रमपि शोषयेत् ॥३८५

---

1. M omits श्च।
2. M मिलितौ
3. The reading is corrupt, *grahendra* means *ravi*.
4. M ०हैद्धं
5. M शे०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकनाडीसमारूढौ चन्द्रमाधरणीसुतौ ।
यदि तत्र भवेज्जीवः तत्र चैकार्णवा मही ॥३८६

बुधशुक्रौ समीपस्थौ गुरुणा च समन्वितौ ।
चन्द्रयोगस्तदा काले जायते वृष्टिरुत्तमा ॥३८७

चैत्रे मासि सिते पक्षे सप्तम्यादि दिनाष्टके ।
यदा गर्जति वृष्टिश्च तदा वृष्टिः शुभा मता ॥३८८

तद्दिनं तच्च नक्षत्रं चतुर्थे वार एव च ।
योगः षोडशको ज्ञेयः पक्षश्चैव चतुर्दशः ॥३८९

चतुष्कं च चतुष्कं च पञ्चकं त्रिकमेव च ।
पञ्चकं षट् च विज्ञेयं भरण्यादौ च भार्गवे ॥३९०

प्रथमचतुष्के गोधनपीडा
द्वितीयचतुष्के वर्षति मेघः ।
पञ्चकयुगले शस्यविनाशः
षट्त्रिक्युगले क्षेमसुभिक्षम् ॥३९१

यद्यैकपक्षे शुक्रस्य उदयास्तमनं भवेत् ।
तदा सुभटकोटीनां मही पिबति शोणितम् ॥३९२

एकं नरे स्यात्तुरगे चतुष्कं
नागे शतं पञ्चशतं रथे च ।
क्रुद्धो जनो मुञ्चति बाणवृष्टिं
स्वातिंगतः शुक्र इवाम्बुवृष्टिम् ॥३९३

इति शुक्रचारफलम् ।

अथ राहुचारफलम्[1] ।

मीने मेषे गते राहौ सुभिक्षं जायते ध्रुवम् ।
तुलाकुम्भे त्वनावृष्टिर्महर्घं मकरे वृषे ॥३९४

राहौ मिथुनकर्कस्थे स्वल्पवृष्टिर्महर्घता ।
कन्यासिंहे यदा राहू रौरवं तत्र निर्दिशेत् ॥३९५

अलिराशिगते राहौ यदा धनुषि संस्थिते ।
तदाहि विविधा रोगाः जायन्ते नात्र संशयः ॥३९६

इति राहुचारफलम् ।

1. Not in M.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ केतुचारफलम्[1]।

केतुचारं प्रवक्ष्यामि यथा गर्गेण भाषितः।
सर्वे ते धारणा जीवा मानुषादेवसंस्थिताः ॥३९७

सूर्यरश्मिस्थिताः सर्वे भ्रमन्तो रविमण्डले।
काले यत्रोदयं यान्ति प्रजानाञ्च भयंकराः ॥३९८

दशप्रचेतसः पुत्राश्चतुर्विंशतिरर्कजाः।
अग्निपुत्राः जिनै संख्या यमपुत्रा नवस्फुटाः ॥३९९

अष्टादश कुबेरस्य वायोर्विंशति देवराट्।
शतं पञ्चोत्तरं जातं केतुः सर्वसंख्यया ॥४००

नभो भाद्रपदे मासि शशिपुत्रोदयो भवेत्।
तस्मिन् वर्षे महामेघास्तोयपूर्णा वसुन्धरा ॥४०१

उन्मार्गे सरितो यान्ति जलयोगसमाहिताः।
सर्वे च सुखिनो लोका धर्माचारव्यवस्थिताः ॥४०२

दानधर्मरतो राजा ब्राह्मणांश्च प्रपूजयेत्।
नदीकूपतडागादिसर्वाणि प्रपूरयेत् ॥४०३

भीयन्ते च तदा गावः तथान्ये च चतुष्पदाः।
देवो न वर्षते तत्र दुर्भिक्षं च महद्भयम् ॥४०४

असत्यवादिनो लोकाः राजाक्षुद्रसमाकुलाः।
परस्परं विरोधश्च पितृपुत्रस्य देवराट् ॥४०५

तीक्ष्णातपः सहस्रांशुः तस्मिन्मासि न संशयः।
सूर्यपुत्रोदये चैव एतद्भवति लक्षणम् ॥४०६

मार्गशीर्षे च पौषे च वह्निपुत्रान्विनिर्दिशेत्।
अग्निपुत्रस्य कर्माणि विषं च प्रबलं भवेत् ॥४०७

तत्र सर्पाः प्रदृश्यन्ते ज्वररोगाश्च दारुणाः।
विद्रवन्ति तदा देशात् समस्ता भयपीडिताः ॥४०८

अग्निचोरभयं तत्र प्रजानां व्याधयस्तथा।
दुर्दिनं जायते तत्र देवश्चैव न वर्षति ॥४०९

1. Not in M.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किञ्चिद्वर्षति पर्जन्यः प्रजाभाग्येन सुन्दरि।
मध्यमा शस्यनिष्पत्तिस्तस्मिन् राष्ट्रे च देवराट् ॥४१०

अग्निपुत्रोदये चैवमेतद्भवति लक्षणम्।
माघे च फाल्गुने मासि यमपुत्रं विनिर्दिशेत् ॥४११

भ्रमन्ति सर्वकर्माणि लक्षणं चैव देवराट्।
तत्र जायेत दुर्भिक्षं सर्वधान्यानि संग्रहेत् ॥४१२

सुवर्णं साम्प्रतं तत्र महर्घं च भविष्यति।
प्रावृट्काले तु सम्प्राप्ते मेघो भवति दुर्बलः ॥४१३

महारौरवदुर्भिक्षं हाहाभूतं प्रवर्तते।
मन्ये तथा महायुद्धं तस्मिन् वर्षे च देवराट् ॥४१४

म्रियन्ते च जनाः सर्वे यमपुत्रोदये फलम्।
चैत्रवैशाखयोश्चैव कुबेरसुतमादिशेत् ॥४१५

कुबेरसुतकर्माणि लक्षणं शृणु देवराट् ॥४१६
यादृशाभ्रयुता मेघा जलं पतति तादृशम्।

हविर्धूमाकुलं सर्वं नन्दते च मुहुर्मुहुः ॥४१७

महोत्सवाः प्रवर्तन्ते पृथिवी च जनाकुला।
ध्वजाश्च तोरणान्येव दृश्यन्ते पुरमध्यतः ॥४१८

व्याकुलाश्चैव हृष्टाश्च सर्वे जनपदस्थिताः।
अग्निष्टोमादिभिर्यज्ञैर्यजन्ते चैव ते जनाः ॥४१९

नर्तन्ति ब्राह्मणास्तत्र क्षत्रिया धर्मतत्पराः।
महासुभिक्षमादेश्यं कुबेर उदिते फलम् ॥४२०

ज्येष्ठाषाढकयोश्चैव वायुपुत्रोदयो भवेत्।
वायुपुत्रस्य कर्माणि लक्षणं शृणु साम्प्रतम् ॥४२१

कुर्वन्ति महावातं महायुद्धं भयानकम्।
भयं च जायते तत्र मारुतान्नात्र संशयः ॥४२२

उच्चैर्मेघा प्रदृश्यन्ते वायुना सह प्रेरिताः।
तरुप्रसादशिखराः पतन्ते पवनाहताः ॥४२३

भग्नानि तत्र सर्वाणि तोरणानि गृहाणि च।
वायुवेगाद्धस्तिशाला निपतन्ति महीतले ॥४२४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौराष्ट्रं नश्यते देवि सवैरामानवास्तथा[1]।
उदग्देशाश्च नश्यन्ति युध्यन्ते च परस्परम् ॥४२५

विरुध्यन्ते भूमिपालाः योजनं भूमिखण्डतः।
राजपुत्रसहस्राणां मही पिबति शोणितम् ॥४२६

देवदेवेन रुद्रेण कथितं गिरिजात्मजाम्।
गर्गेणैवं पुनः प्रोक्तं देवराजसमीपतः ॥४२७

वाराहमिहिरः।

एकोत्तरसहस्रं तु केतोश्चैव तु संख्यया।
उत्पद्यन्ते ग्रहा यस्य पृथक्पृथक् फलानि वै ॥४२८

त्वया संक्षेपतश्चोक्तं मासंमास्य[2] यत्फलम्।
गोपनीयं सदावश्यं न देयं यस्य कस्यचित् ॥४२९

इति केतुचार[3]फलम्।

अथ संक्रान्तिफलम्[4]।

कार्तिके मार्गशीर्षे च सङ्क्रान्तौ यदि वर्षति।
मध्यमं जायते शस्यं पौषे माघे सुभिक्षदम् ॥४३०

पौषे माघे च सङ्क्रान्तौ यदि वर्षति माधवः।
बहुक्षीरघृता गावो बहुशस्या[5] वसुन्धरा ॥४३१

फाल्गुने चैत्रमासे च संक्रान्तौ यदि वर्षति।
विचित्रं जायते शस्यं वैशाखज्येष्ठयोस्तथा ॥४३२

आषाढे चैव सङ्क्रान्तौ यदि वर्षति माधवः।
जायन्ते व्याधयो घोरा ध्रुवं चैव तु देवराट् ॥४३३

श्रावणे तु यदा देवि सङ्क्रान्तौ वर्षणं भवेत्।
सुखं च विद्यते पूर्वं वृष्टिश्चैव तथा पुनः ॥४३४

सर्वदा भवे[6]त् भव्यं द्वौ[7] मासौ वर्षते सदा।
धनधान्यसमायुक्तं नन्दते वर्धते प्रजा ॥४३५

---

1. Read सौवीरा मालवा०.
2. Read ०सि मसि.
3. M drops चार.
4. Not in M.
5. M संख्या
6. M ०वते
7. M दौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मासिभाद्रपदे प्राप्ते वृष्टिः स्याद्यदि सङ्क्रमे ।
बहुरोगकरी सा तु कथितं देवदेवराट् ॥४३६

आश्विनस्य तु मासस्य सङ्क्रान्तौ यदि वर्षति ।
शोभनं च भवेत्सर्वं धनधान्यं चतुष्पदम् ॥४३७

राजराष्ट्र[1]प्रजानां च सर्वोपद्रववर्जितम् ।
एवं शक्र मया ख्यातं मत्प्रोक्तं शूलिना स्वयम् ॥४३८

गर्ग उवाच ।

ऊर्जः सहस्तपस्येषु चैत्रे नभसि भाद्रके ।
अशुभदिने संक्रमाच्च यदा वर्षति माधवः ॥४३९

पौषे माघे च वैशाखे शुक्राषाढाश्विनेषु च ।
संङ्क्रान्तौ वर्षणं चेत्स्यात् तदा वृष्टिः सुशोभना ॥४४०

संक्रान्त्या वर्षणे देवि शुभाशुभफलं च यत् ।
सन्देहं मा कुरुष्व[2]त्र शास्त्रसारं निवेदितम् ॥४४१

अथान्यसंक्रमफलम् ।

रुद्र उवाच ।

मेषराशि[3]गते सूर्ये तुलायां रजनीकरे ।
वर्षणं जायते स्वल्पं सर्वधान्यमहर्घता ॥४४२

वृषराशिगते सूर्ये वृश्चिके यदि चन्द्रमा ।
धान्यानां संग्रहः कार्यो मासयुग्मं च रक्षयेत् ॥४४३

लाभस्तु द्विगुणो देवि तृतीये हानिमादिशेत् ।
मिथुन[4]स्थे रवौ यत्र धनुष्यथ शशी भवेत् ॥४४४

संग्रहेत्सर्वशस्यानि मासमेकं तु स्थापयेत् ।
लाभे द्विगुणता ज्ञेया द्वितीये हानिरुच्यते ॥४४५

कर्कराशिगते सूर्ये मृगास्ये वर्तते शशी ।
धान्यानां सग्रहं कुर्यान्मासषट्कं च स्थापयेत् ॥४४६

1. M ०ष्टं प्र०
2. M ०ष्वा०
3. M ०षि०
4. M drops न.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लाभे द्विगुणता ज्ञेया सप्तमे हानिरेव च।
सिंहराशौ रवौ देवि कुम्भे चन्द्रप्रतिष्ठिते।
यावत्तु पञ्च मासा स्युः सर्वधान्यानि संग्रहेत् ॥४४७

लाभे[1] द्विगुणता ज्ञेया षष्ठे मासि न लाभता।
कन्याराशिगते सूर्ये मीने चैव निशाकरः ॥४४८

धान्यानां संग्रहः कार्यश्चतुर्थे मासि विक्रयः।
लाभे द्विगुणता ज्ञेया पञ्चमे हानिरेव च ॥४४९

तुलाराशौ गते सूर्ये मेषे भवति चन्द्रमाः।
धान्यानां संग्रहं कुर्यात् तृतीये मासि विक्रयः ॥४५०

लाभे[1] द्विगुणता ज्ञेया चतुर्थे हानिरेव च।
वृश्चिकेऽर्के वृषे चन्द्रः सर्वधान्यमवाप्नुयात् ४५१

धनूराशिस्थिते सूर्ये चन्द्रमा मिथुने स्थितः।
संग्रहेत्सर्वशस्यानि मासमेकं तु लाभकृत् ॥४५२

द्विगुणं लाभमाप्नोति द्वितीये हानिरेव च।
मृगास्ये गौरि मार्त[2]ण्डे कर्कटस्थे निशाकरे ॥४५३

धान्यानां संग्रहः कार्यो मासषट्कं च रक्षयेत्।
द्विगुणं लाभमाप्नोति सप्तमे हानिरेव च ॥४५४

घटे रवौ हरौ चन्द्रः सर्वधान्यानि संग्रहेत्।
विक्रयः पञ्चमे मासि द्विगुणं लाभमाप्नुयात् ४५५

मीनस्थे भास्करे देवि कन्यायां चेन्निशाकरः।
धान्यानि संग्रहेद्देवि चतुर्थे मासि विक्रयः ॥४५६

हानिस्तु पञ्चमे प्रोक्ता मया ख्यातं सुरेश्वरि।
इति संक्रमकाले रविराशिचन्द्रराशिवशात्फलम् ॥४५७

अथान्य[3]संक्रान्तिफलम्।

पौषमासस्य संक्रान्तौ रविवारो यदा भवेत्।
द्विगुणं धान्यमौल्यं च कथितं मुनिपुंगवैः ॥४५८

---

1. M ०भो
2. M ०त०
3. M ०न्यत्सं०। The heading is redundant as it occurs earlier after verse 441.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शनिना त्रिगुणं प्रोक्तं भौमे प्रोक्तं चतुर्गुणम् ।
तुल्यं स्याद्बुधशुक्राभ्यां गुरौ सोमे समर्घता ॥४५९

ज्यौतिषं व्यवहारं च प्रायश्चित्तं चिकित्सितम् ।
विना शास्त्रेण यो ब्रूयात् साहसं किमतः परम् ॥४६०

मीने[1] शनैश्चरः कर्के तुलायां मंगलो यदा ।
भ्रमन्ति सर्वलोकाश्च गृहीत्वा खर्परं करे ॥४६१

अतिचारगते जीवे शनौ वक्रमुपागते ।
भूपालं तं न पश्यामि प्रजासंरक्षणे हितम् ॥४६२

अंगारके गते मार्गे यदा संचरते रविः ।
शीघ्रं भङ्गं विजानीयान्मेघं तत्र[2] न संशयः ॥४६३

इति संक्रान्तिफलम् ।[3]

अथ काकनिलयशुभाशुभविचारः ।[4]

ईश्वर उवाच ।

शृणु चान्यद् वरारोहे काकस्य निलयं प्रिये ।
दिशश्च विदिशश्चैव [5]याः शुभाश्चाशुभा तथा ॥४६४

वृक्षस्य पूर्वशाखायां निलयं कुरुते खगः ।
सुभिक्षं क्षेममारोग्यं तस्मिन् वर्षे न संशयः ॥४६५

वृक्षस्य वह्निशाखायां निलयं कुरुते खगः ।
अल्पोदकास्ततो मेघा दुर्भिक्षं च प्रजायते ॥४६६

वृक्षस्य दक्षिणे भागे वायसः कुरुते गृहम् ।
द्वौ मासौ वर्षते देवस्तुषारेण ततः परम् ॥४६७

नै[6]र्ऋत्यां दिशि शाखायां निलयं कुरुते खगः ।
प्रथमं[7] नैव वृष्टिः स्यात्पश्चान्मेघः प्रवर्षति ॥४६८

वृक्षस्य पश्चिमे भागे निलयं कुरुते खगः ।
अतिवृष्टिं विजानीयात् स्थले धान्यं भविष्यति ॥४६९

---

1. M ०ना:
2. M drops तत्र.
3. Not in M.
4. Not in M.
5. M या शुभा चा० ।
6. M ०ऋ०
7. M अतिवृष्टिं विजानीयात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायव्ये तु यदा भागे वायसः कुरुते गृहम् ।
वातवृष्टिं विजानीयादतिवृष्टिश्च जायते ॥४७०

वृक्षस्योत्तरशाखायां निलयं कुरुते खगः ।
सुभिक्षं च विजानीयाद् वायव्येन निवेदितम् ॥४७१

ईशाने तु यदा भागे निलयं कुरुते खगः ।
मध्यमा च भवेद् वृष्टिर्बहुशस्या च मेदिनी ॥४७२

उर्ध्वस्थाने यदा वृक्षे निलयं कुरुते खगः ।
सदा वृष्टिं विजानीयाद् गर्गस्य वचनं यथा ॥४७३

कोटरे गृहप्राकारे[1] निलयं कुरुते खगः ।
राजयुद्धं च दुर्भिक्षं जायते घोरदारुणम् ॥४७४

याम्यां मण्डलमाश्रित्य भूम्यां च कुरुते गृहम् ।
छत्रभङ्गो भवत्येव राजा चैव प्रणस्यति ॥४७५

नदीतीरे यदा भूमौ[2] निलयं कुरुते खगः ।
शुष्कं[3] वर्षं विजानीयाद् वायसेन निवेदितम् ॥४७६

आमिषेण विना यत्र मिलन्ति यदि वायसाः ।
अचिरेणैव कालेन दुर्भिक्षं तत्र जायते ॥४७७

मण्डलेऽपि च पूजायां दक्षिणे वायसो भवेत् ।
पिंगारस्य मृदुर्वाक्यं काकं ध्वंसः[4] प्रजायते ॥४७८

तरुशाखासमारूढो धुनुते पक्षसंचयम् ।
शीघ्रं च वर्षते मेघः कथितं वायसेन तु ॥४७९

उदकं शीतलं पीत्वा वायसः परिपच्यते ।
शीघ्रं वर्षति पर्जन्यः स्थलेन यो न वापयेत् ॥४८०

मधुरं रुदमानश्चेदूर्ध्वदृष्टिर्विहङ्गमः ।
शीघ्रं वर्षति पर्जन्यो वायसेन निवेदितम् ॥४८१

वर्षाकाले महावृष्टिः शीतकाले च दुर्दिनम् ।
उष्णकाले महाघर्मः काकस्थानाद् विनिर्दिशेत् ॥४८२

इति काकनिलयशुभाशुभविचारः ।

---

1. M ०प्र०
2. M च या भूमि
3. M ०ष्कव०
4. M ध्वस्तु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उक्तञ्च ग्रन्थान्तरे—

तिसृषु ककुप्सु कुलायं वृष्ट्यै काकस्य निर्दिष्टम् ।
दुर्भिक्षं मरणं कुरुते याम्ये याम्ये च कोणेषु ॥४८३

काकस्य कुलाये जाते मूर्ध्नि[1] वृक्षस्य वर्षति प्रचुरम् ।
मध्ये मध्यं वर्षति स्कन्धे जातेन जातुचिद् वृष्टिः[2] ॥४८४

भूमौ लग्नानोखरे कोटरे च श्वभ्रे[3] देशे तटेषु च ।
काकालयमालोक्य नीडं[3] निगाधं धीरैर्निवृन्नाशमायास्यतीति[4] ॥४८५

अथ काकाण्डात्फलविचारः ।

एकं भवेद् वारुणमग्निसंज्ञं
द्वितीयकं मारुतजं तृतीयम् ।
ऐन्द्राभिधं स्याद् द्विचतुर्थमेव
पृथक् फलं वच्मिचतुष्टयस्य ॥४८६

बहूदकं वारुणनाममेकं
धरा भृशं नन्दति सर्वशस्यम् ।
मन्दप्रवर्षानिलसंज्ञकाण्डे[5][6]
स्वल्पो भवेत्शस्यतृणादिरोहः ॥४८७

जातानि शस्यानि समीरजेऽण्डे
ऐन्द्राभिधे स्वाभिमता च वृष्टिः ॥४८८[7]

इति काकाण्डात्फलविचारः ।

व्रजति यदि कुजः पतङ्गमार्गे
घट इव भिन्नतलो जलं ददाति ।
भवति च यदि भास्कराग्रगामी
प्रबलघनानपि[8] शोषितुं समर्थः ॥४८९

---

1. M ०ध्रि
2. M वर्षति
3. D ०रं
4. D ०वृष्टिना०
5. M न्दं
6. M न०
7. The manuscript does not indicate verses 486 to 488 clearly. Verse 488 has only one half.
8. M ०च०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठ्यष्टम्योः पूर्णिमायां तुलाषट्सु यदा रविः ।
संक्रान्तिः स्यात्तदा पृथ्वी दुर्भिक्षभयसंकुला ॥४९०

कृष्णे नवम्यां प्रतिपत्तिथौ च
तुलादिषट्के रविसंक्रमः स्यात् ।
चतुर्दशी कामतिथौ च शुक्ले
गौडान्ध्रवंङ्गेषु महाभिघातः ॥४९१

यां तिथिं समनुप्राप्य तुलां याति दिवाकरः ।
तत्रैव सर्वसंक्रान्ति मेषं याति प्रयाति च ॥४९२

इति समाप्तोऽयं ग्रन्थः ।[1]

संवत् १९३४ शाके १७९९ फाल्गुनकृष्णसप्तम्यां
ले०—सूर्यनारायण झा ज्यो० आ० ।

---

1. The copyist inserts five verses on foretelling the result on the basis of the question.

वक्रोत्थाः शुद्धवर्णा गजमितसहिताः पूर्णरवेन्दुच्युताः स्युः
सूर्यं तुष्टेषु शेषोऽद्रिनवशुचिमिते कार्यसिद्धिर्बिलम्बात् ।
नागाब्ध्याशासु हानिर्भुजशरभवके सिद्धिरग्यंगपूर्णे-
सिद्धिः शीघ्रेण वाच्या गणकगणवरैः प्रश्न एकैष पूज्यः ॥१

तिथिप्रहरसंयुक्ते तारकावारमिश्रिते ।
सप्तभिश्च हरेद्भागं शेषो प्रश्नस्य लक्षणम् ॥२

एकेन वसते तत्र द्वाभ्यामागमने शुभम् ।
तृतीयेनार्धमार्गे स्याच्चतुर्थे ग्राममादिशेत् ॥३

पञ्चमे पुनरावृत्तिः षष्ठे संपत्तिरुत्तमा ।
सप्तमे शून्यं विजानीयात् पान्थप्रश्नस्य लक्षणम् ॥४

सप्तत्रयाङ्के कथयन्ति वार्तां
नवैकपञ्चत्वरितं वदन्ति ।
रसाश्च वेदाघटिकात्रयं च
वसुद्वितीयेन च कार्यसिद्धिः ॥५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.